## न कर्मव्यतिहारे। (६/३२१७)

कर्मव्यतिहारे यदुक्तं तन्न भवति। प्रतिषेधागमयोरयं प्रतिषेधः। व्यावक्रोशी,[1] व्यावलेखी, [2]व्यावबर्ती, व्यावहासी वर्तते। 'कर्मव्यतिहारे णच् स्त्रियाम्' (३.३.४३/३२१५) इति [3]णच्प्रत्ययः, तदन्तात् 'णचः स्त्रियामञ्' (५.४.१४/३२१६) ॥

## स्वागतादीनां च। (७/१६४९)

स्वागत इत्येवमादीनां यदुक्तं तन्न भवति। स्वागतमित्याह स्वागतिकः। स्वध्वरेण चरति [4]स्वाध्वरिकः। स्वङ्गस्य [5]अपत्यम् स्वाङ्गिः। व्यङ्गस्य अपत्यम् व्याङ्गिः। [6]व्यडस्य अपत्यम् व्याडिः। व्यवहारेण चरति व्यावहारिकः। व्यवहारशब्दो[7]ऽयं [8]लौकिके वृत्ते वर्तते, न तु कर्मव्यतिहारे। स्वपतौ साधुः स्वापतेयः[9]। द्वारादिषु स्वशब्दपाठादत्र प्राप्तिः।

स्वागत। स्वध्वर। स्वङ्ग। व्यङ्ग। व्यड। व्यवहार। स्वपति। स्वागतादिः ॥

## श्वादेरिञि। (८/१६६०)

श्वादेः अङ्गस्य इञि [10]परतो यदुक्तं तन्न भवति। [11]श्वभस्त्रस्य अपत्यम् श्वाभस्त्रिः। श्वादंष्ट्रिः। श्वन्शब्दो द्वारादिषु पठ्यते, तत्र च तदादिविधिर्भवति इति एतदेव [12]वचनं ज्ञापकम्।

[८४३] इकारादिग्रहणं [13]कर्तव्यं श्वागणिकाद्यर्थम्। (म. भा. ३. ३१९)

श्वगणेन चरति श्वागणिकः। श्वायूथिकः। तदन्तस्य चान्यत्रापि तद्धिते प्रतिषेध इष्यते। श्वाभस्त्रेः इदम् श्वाभस्त्रम् ॥

## पदान्तस्यान्यतरस्याम्। (९/१६६१)

श्वादेः अङ्गस्य [14]पदशब्दान्तस्य अन्यतरस्यां यदुक्तं तन्न भवति। श्वपदस्य इदम् श्वापदम्, शौवापदम् ॥

## उत्तरपदस्य। (१०/१३०६)

उत्तरपदस्य इत्ययमधिकारः 'हनस्तोऽचिण्णलोः' (७.३.३२/२४७४) इति प्रागेतस्मात्। यद् इत ऊर्ध्वमनुक्रमिष्यामः उत्तरपदस्य [15]इत्येवं तद् वेदितव्यम्। वक्ष्यति – 'अवयवादृतोः' (७.३.११/१३९७)।

---

1. इत्यञन्तात् टिड्ढाणञ् इति ङीप् इत्यधिकम् क. इ. 2. व्याववर्षी क, व्यववर्ची इ. 3. इच्प्रत्ययः क. 4. स्वध्वरिकः क. 5. अपत्यं नास्ति ब, अङ्गस्य अपत्यं आङ्गिः क. 6. व्याडस्य क. इ. 7. अयं नास्ति क. 8. लोकवृत्तौ इ, लोकवृत्तः ह. 9. पथ्यतिथिवसतिस्वपतेर्ढञ् इत्यधिकम् ह. 10. प्रत्यये इत्यधिकम् ह. 11. श्वभस्त्रस्य अपत्यं नास्ति ह. 12. वचनम नास्ति इ. 13. हि इत्यधिकम् इ. क. 14. पदशब्दोत्तर– शब्दस्य इ. 15. च इत्यधिकम् क. ड.

THE SANSKRIT LIBRARY
FAIRFIELD, IA 52556